# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-अक्टूबर-२०१९

| कक्षा -आचार्यद्वितीयवर्षम् (सत्रम्-३) | प्रश्नपत्रम् – ५ | गुणा: - ७० |
|---|---|---|
| विषय: - फलितज्योतिषम् | (C.E.- ५.३.३. New ) | समय: -३.०० त: ६.०० |
| दिनाङ्क: - १४/१०/२०१९ | सन्दर्भग्रन्थ: - मानसागरी । | |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितयो: एकस्य सान्वयं व्याख्या कार्या । ०५**

(१) रविवर्ज्जंद्वादशगैरनफा चन्द्राद्द्वितीयगै: सुनफा ।
उभयस्थितैर्दुरुधरा केमद्रुमसंज्ञको योऽन्य: ॥

(२) सूर्याद्व्ययगे वोशर्द्वितीयगैश्चन्द्रवर्जितैर्वेशि: ।
उभयस्थितैर्ग्रहगणैरुभयचरीनामत: प्रोक्त: ॥

**प्रश्न: २ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं निबन्धयत । १०**

(१) ग्रन्थानुसारं अरिष्टाध्यायस्य सारांशं लिखत ।

(२) दुरुधरा-योगस्य फलं लिखतु ।

**द्वितीयान्विति:**

**प्रश्न: ३ अधोलिखितयो: एकस्य सान्वयं व्याख्या कार्या । ०५**

(१) अपुत्रं कुरुते भानु: पुत्रमेकं निशाकर: ।
सशोकं पुत्रहीनं च पञ्चमो धरणीसुत: ॥

(२) राहुस्त्रिषष्ठलाभे लग्नात्सौम्यैर्निरीक्षित: सद्य: ।
नाशयति सर्वदुरितं मारुत इव तूलसङ्घातम् ॥

**प्रश्न: ४ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं निबन्धयत । १०**

(१) द्वादशभावस्य सारांशं लिखतु ।

(२) ग्रहाणां पुरुषाकारचक्रस्य विचार: ।

**तृतीयान्विति:**

**प्रश्न: ५ अधोलिखितयो: एकस्य सान्वयं व्याख्या कार्या । ०५**

(१) बुधस्य रेखया सौख्यं मिष्ठान्नं लभते सदा ।
दानधर्मरतश्चैव द्विजदेवाग्निपूजक: ॥

(२) महिषयोर्बलबुद्धिविहीनता जयमभं प्रबलाग्निभयातुरम् ।
शकटयो: प्रबले बलसंयुतो महिषयोर्यदिवाहनं भवेत् ॥

**प्रश्न: ६ अधोलिखितयो: कस्यचित् एकस्य उपरि निबन्धं निबन्धयत । १०**

(१) ग्रहभावबलाध्यायस्य सारांशं लिखत ।

(२) पिण्डायु: साधनम् ।

## चतुर्थान्विति:

**प्रश्न: ७ अधोलिखितयो: एकस्य सान्वयं व्याख्या कार्या । ०५**

(१) प्राप्नोति सौरस्यदशाविपाके दुर्गादिसीमागिरिनिर्झरेण ।
सुधान्यजीर्णाम्बरभूमिलाभं संयुज्यतेऽश्वैर्महिषादिभिश्च ॥

(२) पापादिरोगव्यसनादिमुक्तोधर्मोदयं ज्ञानसुखागमंच ।
सूर्य: सुरेज्यान्तरगो विपाके करोति लक्ष्मीं धनवर्धनं च ॥

**प्रश्न: ८ अधोलिखितयो: प्रश्नयो: कस्यचित् एकस्य उपरि निबन्धं निबन्धयत । १०**

(१) योगिनीदशासाधनम् ।

(२) पिङ्गलाया: अन्तर्दशाफलं लिखतु ।

## संयुक्तान्विति:

**प्रश्न: ९ निम्नलिखितेषु दशाणाम् अतिलघूत्तरं यच्छत । १०**

(१) केमद्रुमयोग: कदा भवति ?

(२) बुधात् अनफायोग: भवति तस्य फलं किम् ?

(३) ध्वजयोगस्य फलं किम् ?

(४) लग्नात् २,४,६,८,१०,१२ अन्तरेण सर्वे ग्रहा: स्यु: क: योग: ?

(५) पञ्चमस्थाने सूर्य: स्यात् पुत्रसुखं भवति वा न ?

(६) लग्नात् सप्तमभावे सर्वे ग्रहा: स्यु: तदा कस्मिन् वर्षे भाग्योदयं भवति ?

(७) जन्मनक्षत्रोत्पन्नजातकस्य कति वर्षाणि आयु: स्यात् ?

(८) कति अवस्था ? कानि च तानि नामानि ?

(९) चन्द्रस्य रेखा फलं किम् ?

(१०) अंशायु: कदा भवति ?

(११) नैसर्गिकायु: कति वर्षात्मिका ?

(१२) योगिन्यादि – कति दशा: ?

(१३) सप्तमभावस्य कारकग्रहा: के ?

(१४) भौमात् क: ग्रहोत्पन्न: ?

(१५) मानसागरी-ग्रन्थानुसारं ग्रहाणां कति अवस्था: ?

----oooo----